International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(2): 39-41
© 2024 IJMH
www.themultijournal.com

Received: 18-06-2024
Accepted: 25-06-2024
Publish : 29-06-2024

**डा.दु.फणियज्ञेश्वरयाजुलु**
सहायकाचार्यः, कृष्णयजुर्वेदविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपतिः

**Correspondence:**
**डा.दु.फणियज्ञेश्वरयाजुलु**
सहायकाचार्यः, कृष्णयजुर्वेदविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपतिः

# निरुक्त-मीमांसयोः देवतास्वरूपविचारः।

**डा.दु.फणियज्ञेश्वरयाजुलु**

**शोधसारः-**

सनातनभारतीयसंस्कृतौ देवतानां महद्वैशिष्ट्यं वर्तते। केचन धर्मानुयायिनःबहुदेवतावादं गृह्णन्ति किंतु प्रचीनवैदिककाले एतादृशवादः न प्रचलति स्म। तथापि यागप्रधाने वैदिक वाङ्मये इन्द्रादि बहु देवतानाम् उल्लेखः दृश्यते। किंच यागादिषु पार्थिवद्रव्याणां देवतारूपेण स्तुतिः क्रियते। उपनिषत्सु त एव इन्द्रादयः परब्रह्म रूपेण वर्णिताः दृश्यन्ते। पुराणेतिहासादिष्वपि बहुदेवतावादः विग्रहाराधनं च समर्धितं वर्तते। प्रबन्धेऽस्मिन् निरुक्तमीमांसा मतानुसारम् आध्यात्मिकाधिदैविकदृष्ट्या तथा आधियाज्ञिकरीत्या देवतानां एकत्व बहुत्वादि स्वरूपं तेषां विग्रहादिमत्वं च प्रपञ्च्यते।

**कुञ्चिका शब्दाः -** देवता, आध्यात्मिकम्, आधिदैविकम्, आधियाज्ञिकम्, चोदना, ईश्वरः, व्यपदेशः, शास्त्रजन्या, हव्यः, विग्रहमत्वम्।

**प्रस्तावना -**

**"देवतोद्देशेन द्रव्यत्यागो यागः"** इति वचनात् देवतामुद्दिश्य कस्यापि द्रव्य परित्यागो यागः इति ज्ञायते।"तस्य द्रव्यस्य देवतां प्रति या उत्सर्गक्रिया सैव देवतेति कर्काचार्याणामभिप्रायः। इदानीं का नाम देवतेति जिज्ञासायां विविधैः आचार्यैः एवं प्रत्यपादि। तेषु चोदना लक्षणो देवता शब्दः इति कर्काचार्याः,या मन्त्रेण उच्यते सा देवता इति तन्मतम्। यास्काचार्याणां मते तु **" देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवति "** इति। केषाञ्चिन्नये देवस्तु मनुष्यवत् हस्तपादादि विशिष्टः। केषाञ्चन मते देवस्य मनुष्यादि रूपं नास्ति स तु नैसर्गिक शक्तेः कल्पनामात्रम् इति। केचन मनुष्याः पुण्यविशेषेण देवतां प्राप्नुवन्ति इत्यपरे अभिप्रयन्ति। अस्य देवताविषयाणि बहूनि वाक्यानि निरुक्तादि वेदाङ्गेषु साङ्ख्यादि दर्शनग्रन्थेषु आचार्यैः प्रतिपादितानि दृश्यन्ते। यद्यपि आस्तिकदर्शनेषु देवता विषये विमतिरस्ति परन्तु प्रबन्धेऽस्मिन् मीमांसानिरुक्तयोःवैदिकदेवताविषयकनयं पर्यालोच्य तयोः पौंस्यं विचार्यते।

**यास्काचार्यमते देवता स्वरूपम्-:**

यास्काचार्यः स्वकीयवेदाङ्गनिरुक्ते दैवतकाण्डे सप्तमेऽध्याये देवता विषयकं चिन्तनं कृतवान्।दुर्गाचार्यः अस्य प्रकरणस्य महत्वमेवं वदति-" **दैवतमन्तरेण न शक्यो देवता पदार्थः सम्यगेव बोद्धुं देवतापरिज्ञानानुऋबद्धस्त्वखिलः पुरुषार्थ इत्यतो दैवतं प्रकरणं व्याख्यास्याम इति वाक्यशेषः"** इति। यास्केन देवता शब्दव्युत्पत्तिः एवं प्रदर्शिता- **देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवति वा"**[1] इति। ऐश्वर्यादिप्रदानात्तेजोमयत्वात् स्वयं प्रकाशकत्वात् द्युनामके स्थाने अवस्थानाद्वा देव इत्युच्यते।

यद्यपि यागेषु एकदेवतासंबन्धेन नामानि श्रूयन्ते, तथापि तत्र एकैवदेवतेति न मन्तव्यम्। दैवतस्य मन्त्राधीनत्वात्। प्रधानादिभेदेन तेषां कालद्रव्ययोः यद्यपि भेदो वर्तते। तथापि एकस्यैव देवस्य संबन्धी अयं यागः इति वक्तुं न शक्यते प्रयाजादि अवान्तरदेवानामुपस्थानात्। यथा सोमयागे एकमेव सोमरसात्मकं द्रव्यम् इन्द्राग्निवरुणादीन् देवान् उद्दिश्य स्तुतिः तथा आहुतिः समर्प्यते। उक्तं च यास्केन – यत्काम ऋषिः यस्यां देवतायाम् आर्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति[2] इति। मन्त्राः मननात्[3] इति निरुक्तवचनात् सामान्येन मन्त्रस्यैव देवता भवति। येन देवता स्मर्यते तथा कर्मादिषु देवतानां मननं भवति स मन्त्रः । न केवलं देवताः अपि च तत्संबन्धि कर्मजातस्य

स्मरणं भवति। तथा हि दुर्गाचार्याः – तेभ्यो ह्याध्यात्माधिदैवाधियज्ञादि मन्तारो मन्यन्ते तदेषां मन्त्रत्वम् इति। अयं मन्त्रः पुनस्त्रिविधः इति यास्काचार्यस्य समयः – तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृताः आध्यात्मिक्यश्च[4] इति ।

यत्र क्रियायाः प्रयोगः प्रथम-मध्यम-उत्तमपुरुषेषु भवति तत्र क्रमेण पूर्वोक्तत्रैविध्यं भवतीति यास्काचार्यैः निर्णयः कृतः। वेदेषु देवतानां स्वरूपं त्रिविधं प्राप्यते। तच्च 1.पुरुषविग्रहविशिष्टाः, 2. अपुरुषविधाः तथा 3.उभयविधाश्चेति। तत्र ये देवतानां पुरुषाकारं चिन्तयन्ति ते पञ्चयुक्तीः प्रदर्शयन्ति।

1. चेतनावद्वद्धि स्तुतयो भवन्ति – चेतनायुक्तप्राणिनामिव तेषां स्तुतयो दृश्यन्ते। यथा विष्णोर्नुकं वीर्याणि प्रवोचम्[5] अत्र नुकशब्दः कर्मवाचीति भाष्यकारैः व्याख्यातम्।

2. तथाभिधानानि – मनुष्यादिवत् देवानामपि परस्परं संभाषणं भवतीति संवादसूक्तादिषु स्पष्टमुच्यते। यथा यमयमीसंवादसूक्तम्[6]।

3. अथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते – पुरुषवदेतेषां हस्तपादाद्यङ्गानाम् उल्लेखः दृश्यते। यथा ऋष्वात इन्द्रस्थविरस्य बाहू[7] इति।

4. अथापि पौरुषेयविधिकैः द्रव्यसंयोगैः – मनुष्यवत् गवाश्वाजादि द्रव्यसंयोगवत्वात् देवानां पुरुषाकृतित्वम् – यथा - आ नो नियुद्भिः ...... उपयाहि यज्ञम्[8] इति।

5. अथापि पौरुषविधिकैः कर्मभिः – पुरुषवत् पानभोजनादि युक्तत्वात् देवा अपि मनुष्यसदृशाः इति पुरुषाकारवादिनः मन्यन्ते। यथा अद्धीन्द्रपिब च प्रस्थिस्य[9] इति।

अपुरुषाकृतिवादिनां मतं वर्णयन् पूर्वोक्त पञ्चयुक्तयः यास्काचार्येण निराक्रियन्ते। अपुरुषविशिष्टाः अग्निवाय्वादिपदार्थाः देतात्वेन स्तूयन्ते। यथा अग्निमीळे पुरोहितम्[10] इति । अक्षप्रभृत्योषधिपर्यन्तानि अचेतनवस्तून्यपि स्तूयन्ते, न केवलं चेतनवस्तु स्तुतिः। तस्मात् चेतनवस्तुस्तुतिमत्वं देवतानां पौरुष्यविध्ये अहेतुरिति सिद्धान्तः। पौरुषेयविधिकैः अङ्गैः संस्तूयन्ते इति तु अचेतनेष्वपि भवति यथा अभिक्रन्दन्ति हरितेभिरासभिः[11] इति ग्रावस्तुतिः। पौरुषेयविधिकैः द्रव्यसंयोगैरित्येतदपि तादृशमेव यथा सुखं रथं युयुजे सिन्धुरश्विनम्[12] इति नदीस्तुतिः। तस्मात् द्रव्यसंयुक्ततया स्तुतित्वेऽपि देवानां पुरुषाकारचिन्तनं न युक्तम्। अपि वा उभयविधास्युः इति तृतीयमुभयविधत्वं प्रतिपादयति। वेदप्रामाण्यात् देवाः पुरुषाकारविशिष्टाः यथा भवन्ति तथा अपुरुषविधा अपि भवन्तीति तृतीयपक्षिणां नयः। यास्काचार्येण चतुर्थपक्षमपि प्रतिपाद्यते। अपि वा पुरुषविधानामेव स्वतां कर्मात्मानः एते स्युः। यथा यज्ञो यजमानस्य। एषः व्याख्यनसमयः इति। ये तावद्वेदे पुरुषाकारेण वर्ण्यन्ते त एव पार्थिवकर्मसंपादनार्थं पृथिवीजलाग्न्यादि रूपं धृत्वा प्रकाशन्ते। तस्मात् ते कर्मात्मानः। किञ्च अचेतनादिषु चेतनस्य विद्यमानत्वं ब्रह्मसूत्रेष्वपि कथितम् – अभिमानिव्यपदेशस्तु विशेषाणिगतिभ्याम्[13]। यास्काचार्येणाप्युक्तं तासां महाभाग्यात् एकैकस्या अपि बहूनि नामधेयानि भवन्ति। अपि वा कर्मपृथक्त्वात्[14] इति। ऐश्वर्यस्य वैविध्यात् तथा कर्मणां विचित्रत्वात् देवा हि पृथक् पृथक् रूपेण नाम्ना च स्तूयन्ते।

**मीमांसानुसारं देवतास्वरपम् –**

मीमांसकानां मते शब्दमयी देवता। शबरस्वामिना स्वकीयभाष्ये देवतास्वरूपमधिकृत्या पक्षत्रयं प्रतिपादितम्। 1. अर्थो देवता. 2.शब्दविशिष्टोर्थोदेवता. 3.शब्दोदेवता। तत्र तृतीयं पक्षं सिद्धान्ती आद्रियते। विधिवाक्यस्थ देवतावाचकशब्देन यागो संबध्यते अतः विध्युल्लिखितशब्द एव देवता स्यात् न तात्पर्यवाची। तस्मात् विधिवाक्यगतशब्द एव देवतास्वरूपो नान्यः तथा च सूत्रम् – विधिशब्दस्य मन्त्रत्वं भावः स्यात् तेन चोदना[15] । तच्च विधिवक्यस्थ शब्दस्य देवतात्वप्रतीतिः मीमांसकैः त्रिभिः प्रकारैः प्रतिपादितः तद्धितेन, चतुर्थीविभक्त्या तथा मन्त्रवर्णेन इति। भट्टपादेनोक्तम् –

**तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः ।**
**देवताया विधिस्तत्र दुर्बलं तु परंपरम्**[16]।।इति

देवतोद्देशेन द्रव्यत्यागो यागः इति पूर्वमुल्लिखितम्। इन्द्राय इदं न मम इत्यादि मानसव्यापारः त्याग इत्यनेन प्रतीयते। स च उत्पत्तेः अव्यवहितोत्तरक्षणे विनश्यति। कार्यनियतपूर्ववृत्तित्वस्य कारणत्वात् यजेतस्वर्गकामः इत्यादौ स्वर्गरूपफलप्राप्तेः अव्यवहितपूर्वमेव यागरूपकारणस्य उपस्थितिः आवश्यकी भवति। तथा हि

**अन्यथा सिद्धि शून्यस्य नियता पूर्ववृत्तिता।**
**कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्**[17]।। इति

अत्र जन्मान्तरभावि स्वर्गप्राप्तिं प्रति अनुष्ठीयमानस्य यागस्य कारणत्वं नास्ति। अतः यागफलयोः मध्ये अपूर्वं मीमांसकैः कल्पितम् । तन्त्रवार्तिके अपूर्वलक्षणमुक्तम् –

**कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।**
**योग्यता शास्त्रजन्याय सा परापूर्वमुच्यते**[18]।।इति

तथा हि शबरस्वाना उक्तम् यागेन अपूर्वं कृत्वा स्वर्गं भावयेदिति। अचेतनस्य यागस्य फलप्रदातृत्वमप्रसिद्धमिति हेतोः चेतनवस्तुनः एव फलं स्वीकरणीयमिति बादरायणेन सूत्रितम् - फलमत उपपत्तेः[19] इति। शाङ्करभाष्येऽपि अपूर्वस्य फलोत्पादकत्वं नास्तीत्याह – कर्मकार्यादपूर्वात् फलमुत्पत्स्यत इति तदपि नोपपद्यते, अपूर्वस्य अचेतनस्य काष्ठलोष्ठसमस्य चेतेन अप्रवर्तितस्य प्रवृत्त्यनुपपत्तेः तदस्तित्वेच प्रमणाभावात् इति। यद्यपि बादरायणेन ईश्वरस्य फलप्रदातृत्वं स्वीकृतं श्रुतिप्रमाणात्। परन्तु जैमिनिमते धर्म एव फलस्य दाता अत एव बादरायणेन सूत्रितम्- धर्मं जैमिनिरत एव इति । कर्मानुष्ठानस्य वैयर्थ्यापत्तिनिरासार्थं धर्मस्यैव फलप्रदातृत्वं मीमांसकैरङ्गीकृतम्। शङ्गराचार्यैः स्वभाष्ये स्पष्टीकृतं यत् – तत्र च विधिश्रुतेर्विषयभावोपगमात् यागः स्वर्गस्योत्पादकः इति गम्यते। अन्यथा हि अननुष्ठातृके यागः आपद्येत तत्रास्योपदेशवैयर्थ्यं स्यात् । किञ्च ईश्वरस्तु फलं ददातीत्यनुपपन्नम्, अविचित्रितस्य कारणस्य विचित्रकार्यानुपपत्तेः वैषम्यनैर्घृण्यप्रसङ्गात् अनुष्ठानवैयर्थ्यापत्तेश्च[20]। तस्मात् धर्मादेव फलम्।

शब्दार्थयोः संबन्धरूपेण अनुमानादिप्रमाणेन वा ईश्वरस्य अस्तित्वं न स्वीकुर्वन्ति मीमांसकाः। तथापि यागप्रमाणसिद्धत्वात् ते वैदिकेश्वरस्य अस्तित्वं स्वीकुर्वन्ति। तथा हि भट्टाचार्याः तदीय बृहट्टीकायां(इदानीम् अनुपलभ्यते) वदन्ति -

**यदीयशक्यनाविष्टं जगत्स्पन्दितुमक्षमम्।**

**युक्तिभिस्तपन्होतुं कः शक्तः परमेश्वरम्**[21]।।इति

एतैरुदाहरणैरिदं स्मष्टं भवति यत् शबरस्वामिप्रभृतयः प्राचीनाः अनुष्ठानस्य वैयर्थ्यनिरासार्थम् ईश्वरस्य फलदातृत्वं नाङ्गी-कृतवन्तः तथापि अर्वाचीनैः ईश्वरस्य फलदातृत्वे कारणत्वं वेदमूलमिति मत्वा स्वीकृमेव। नारयणपण्डितेन स्वीय मानमेयो-दयग्रन्थे आह । सिद्धस्तार्किकेश्वरनिरासः । वैदिकेश्वरः परम-कारुणिकः पुनरस्माकमनुगुण एव[22]।

**उपसंहारः–** निरुक्तकाराभिप्रायेण देवतानां पुरुषापुरुषाकार-चिन्तनम् आधिदैविकं तथा आधियाज्ञिकम्। तत्र आध्यात्मिक-पक्षमाश्रित्य विशेषेण किमपि नोक्तम्। तन्मते आध्यात्मिकदेवता तु सर्वजगतः ईश्वरः, अवयवरहितः, परमात्मा ब्रह्म एव। किन्तु देवताविषयकमाकारचिन्तनं केवलं आधियाज्ञिकमिति जैमिनिना चिन्तितं यतो हि मीमांसकानां मते सर्वेषां मन्त्राणां विनियोगः यज्ञकर्मण्यैव भवति। तस्य साफल्यसंपादनमेव तेषां लक्ष्यमिति तु सर्वप्रसिद्धम्। मीमांसाशास्त्रस्य कर्मानुष्ठानपरत्वात् तद्भिन्नदेवता चिन्तने तेषाम् आग्रहो नास्ति। तथापि कैश्चन अर्वाचीनैः मीमांसकैः परमकारुणिकस्य ईश्वरस्य अस्तित्वं स्वीकृतम्। शबरस्वामिना यत् देवतानाम् अविग्रहवत्वं यत् प्रतिपादितं तत्सत्यम्। विग्रहवत्व-वचनादिकं मन्त्रार्थवादमूलकं, मन्त्राणामनुशीलनेन इदं ज्ञायते यत् देवताः विग्रहरहिताः। तेषां बोधः केवलं मन्त्रेणैव भवति। यधुष्ठिरमीमांसकेन मतमिदमादृतम्। परमेश्वरस्य खल्वष्टोपयो-गित्वेनैवोपास्योस्ति। नातो वेदेषु ह्यपरा काचिद्देवता पूज्योपा-स्यत्वेन विहितास्तीति निश्चीयताम्[23] इति दयानन्दसरस्वतिनापि प्रतिपादितम्। तन्नये मन्त्र एव देवताशब्दवाच्यो भवति। तथा चोक्तं यत्र यत्र देवतोच्यते तल्लिङ्गो मन्त्रो ग्राह्य इति। अपि च उक्तम् – यदेवार्थप्रतीतिकारणं देवतं प्रकाश्य येन भवति स मन्त्रो देवताशब्दवाच्यः[24] इति ।

एवं निरुक्त-मीमांसयोः देवतास्वरूपं यथामति प्रतिपाद्य विरम्यते।

स्वस्ति।।

**सङ्केताक्षरसूची**

निरुक्तम् –

| | |
|---|---|
| तै.सं. | तैत्तिरीयसंहिता |
| तै.ब्रा. | तैत्तिरीयब्राह्मणम् |
| ऋ.सं. | ऋग्वेदसंहिता |
| ब्र.सू. | ब्रह्मसूत्रम् |
| ब्र.सू.भा. | ब्रह्मसूत्रभाष्यम् |
| मी.सू. | मीमांसासूत्रम् |
| तन्त्रवार्तिकम् | तन्त्रवार्तिकम् |
| भाषापरिच्छेदः | भाषापरिच्छेदः |
| बृहतीटीका | बृहतीटीका |
| मानमेयोदयः | मानमेयोदयः |
| भाष्यभूमिका | भाष्यभूमिका |

**उपयुक्तग्रन्थसूची**

1 . तन्त्रवार्तिकम्  - चौखाम्बासंस्कृतबुक् डिपो, वाराणसी- 1903
2. ऋग्वेदभाष्यभूमिका – अज्मेर् वैदिकपुस्तकालय 1970
3. निरुक्तम् – परिमळापब्लिकेषन्स् डिल्ली 2017
4.भाषापरिच्छेदः – बहाबोधिबुक् एजन्सी कोल्कत्ता. 2018
5. मीमांसाभाष्यम् – सोनीपथ् 1977
6. ब्रह्मसूत्रभाष्यम् – चौखाम्बासंस्कृतप्रतिष्ठानम् डिल्ली 2013
7. तैत्तिरीयसंहिता – चौखाम्बापब्लिकेशन्स् वाराणसी 1980
8. तैत्तिरीयब्राह्मणम् - चौखाम्बापब्लिकेशन्स् वाराणसी 1980
9.ऋक्संहिता चौखाम्बापब्लिकेशन्स् वाराणसी 1978

**पाद टिप्पणी**

1. निरुक्तम् – 7-15
2. निरुक्तम् – 7-1
3. निरुक्तम् -7-12
4. निरुक्तम् – 7 - 1
5. तै.सं. 1.2.13.
6. ऋ.सं. 10-10.
7. तै.ब्रा.2.6.13
8. तै.ब्रा 2.8.1
9. ऋ.सं 10.116.7
10. ऋ.सं..1.1.1
11. ऋ.सं.10.94.2
12. ऋ.सं.10.75.9
13. ब्र.सू. 2.1.5
14. निरुक्तम् 7.5
15. मी.सू. 10.4.23
16. तन्त्रवार्तिकम् 2-2-9.23
17. भाषापरिच्छेदः कारिका 16
18. तन्त्रवार्तिकम् – 2.1.2
19. ब्र.सू. 3.2.38
20. ब्र.सू.भा. 3.2.38
21. बृहतीटीका
22. मानमेयोदयः
23. भाष्यभूमिका पृ -74
24. भाष्यभूमिका पृ -62